# Naradakritashiva Stuti Evam Shivaprakatya

# नारदकृताशिवस्तुतिः एवं शिवप्राकट्य

## Document Information

Text title : Naradakritashiva Stuti Evam Shivaprakatya

File name : shivastutiHnAradakRRitAshivaprAkaTya.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 5 - jaigIShavyaprasAdakaraNam | 35-54||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# नारदकृताशिवस्तुतिः एवं शिवप्राकट्य

शिव शिव भव हर देवशासन नगशर पाहि दयाकटाक्षसारैः ।
भव भवजनितां रुजं हराशु प्रमथाधीश्वर वीर धीर पाहि ॥ ३५॥

शिव शिव दहनाब्जमित्रसोमप्रकटविलोचन कृत्तिवास शम्भो ।
तव शिव कृपया स्मरान्धकारे भव भवशमनाद्भयं न चैव ॥ ३६॥

हरगिरिसुतया सदोपकण्ठ प्रबलगराशन नीलनीलकण्ठ ।
हृदिभवयमिनां किलोपकण्ठ प्रथितमहोरगभोगशोभिकण्ठ ॥ ३७॥

हर हर शमनैकभीतिजातं हर हर भवजातघोरदुःखम् ।
हर हर पापमपाकुरुष्व शम्भो हर हर मुरजित्सुपूजिताङ्घ्रे ॥ ३८॥

शम्भो शङ्कर चन्द्रशेखर दयासारामराधीश्वर
पापापारजलाब्धिशोषणमहाबाडव्यवह्ने शिव ।
कान्तार्धाकृतिशोभिताङ्ग कमलाकान्ताक्षिपूज्याङ्घ्रिक
विश्वेशानविधिप्रचण्डशिरसालग्नप्रयाणे हर ॥ ३९॥

शूलप्रोत्थितदक्षवक्षहरण त्र्यक्षामराधीश्वर
पाहीमञ्जनमर्भकं तव विभो भावैकलभ्यप्रभो ।
गानं ते शृणु नारदस्य हि मुखाद्वीणाक्वणन्मञ्जुलम्
(गानं संशृणु देव नारदमुखाद्वीणाक्वणन्मञ्जुलम्)
भो भो देववर प्रसीद भगवन्दृष्टिं कृपायाः कुरु ॥ ४०॥

--

गानान्ते नारदमुखाद्वीणाक्वणनमञ्जुलम् ।
श्रुत्वैवं नन्दिकेशाद्या गणाश्शभोर्महात्मनः ॥ ४१॥

व्यजिज्ञिपंस्तेदेवाय शङ्कराय महात्मने ।
प्रणम्प नन्दिकेशोऽपि पिधायास्यं करेण वे ॥

उवाच देवं वरदं प्रसन्नास्यं त्रिलोचनम् ॥

- -
नन्दिकेश्वरः -
शम्भो शङ्कर धूर्जटे त्रिणयनापारव्यथां संहर
पारावारमहाप्रभाव जगतां व्यापारसारादर ।
त्वन्नामामृतधारया जगदिदं प्राप्तस्तवेशान्तिकम्
सम्भाव्य प्रमथाधिनाथ पदवीं द्रष्टुं पदाब्जं तव ॥ ४३॥

द्वारे तिष्ठति वारितस्सहि मया किञ्चाज्ञयाशुप्रभो
देवाज्ञावसरेण तं गमयितुं दिव्यं मुनिं नारदम् ।
त्वत्पादाम्बुजलोलमिष्टमनसं सर्वैर्विशिष्टान्तरम्
भक्तिज्ञानविरक्तिशालिसुखितः पादो दिदृक्षुः प्रभो ॥ ४४॥

(भक्तिज्ञानपुरस्कृतस्तवपदद्वन्द्वावलोकोत्सुकः) ॥ ४४॥

- -
नन्दिकेशवचश्श्रुत्वा कटाक्षाग्रेण शङ्करः ।
संज्ञां चक्रेऽखिलेश्शानो नारदागमनं प्रति ॥ ४५॥

नारदोऽपि च देवेशं नता तुष्टाव हिर्षितः ।
शिपिविष्टं महादेवमष्टाकृतिमनोहरः ॥ ४६॥

- -
नारदः -
जय जय देव महेश धूर्जटे जयजय विश्वविधान दक्षशिक्ष ।
जय जय विश्रुतवेदगीतकीर्ते जय जय भक्तजनार्पितैकभुक्ते ॥ ४७॥

जय जय भगवंस्तपःक्रियाणां फलदानोन्मुख पञ्चवक्र शम्भो ।
तव शिव भगवन्पदाब्जयुग्ममभिपूज्य स्वहृदा तपैकराशिः ॥ ४८॥

- -
मुनिरास्ते हिमवन्नगोर्ध्वमौलौ तव दिव्यामृतदेहलोकतैकतर्षः ।
इत्थं नारदवाक्येन जातहर्षो महेश्वरः ।
जैगीषव्यं ययो द्रष्टुं नानागणवरैर्वृतः ॥ ४९॥

- -
आरुह्य शाक्करं दिव्यं नानालङ्कारभूषितम् ।

नानागणमुखोद्गीतवाद्यवृन्दकृतारवम् ॥ ५० ॥

छत्रचामरहस्तैश्च पताकाविधृतैर्गणैः ।
उमया स्कन्दहेरम्बनन्दिभृङ्गिगणावृतः ॥ ५१ ॥

क्षणेन हिमवन्मौलिमाजगाम महेश्वरः ।
मुनिभिर्गणमुख्यैश्च मन्दस्मितमनोहरः ॥ ५२ ॥

उद्यच्छाङ्कधवलधावल्याङ्कसमप्रभः ।
गङ्गातुङ्गतरङ्गौघमौलिद्युतिविराजितः ॥ ५३ ॥

- -
दृष्ट्वा तं मुनिमेकाग्रमानस स महेश्वरः ।
दयाकटाक्षामृतसिन्धुवर्षैर्वल्मीकभूतम्मुनिमाववर्ष ।
स चोत्थितो देववरं प्रणम्य तुष्टाव चाष्टाकृतिमप्रमेयम् ॥ ५४ ॥

- -

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये नारदकृताशिवस्तुतिः एवं शिवप्राकट्य ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः ५ - जैगीषव्यप्रसादकरणम् । ३५-५४ ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 5 - jaigIShavyaprasAdakaraNam . 35-54..

Notes:
Muni Nārada मुनि नारद eulogizes Śiva शिव, wishing to see Him. Śiva शिव; being apprised of the same by Nandikeśvara नन्दिकेश्वर, manifests His Divine Appearance mounted on Nandi नन्दि and accompanied by Umā उमा, Heramba हेरम्ब, Skanda स्कन्द and His gaṇa-s गणाः .

Encoded and proofread by Ruma Dewan

---

*Naradakritashiva Stuti Evam Shivaprakatya*
pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*